"तदर्द्धिकं पादिकं स्यात्" मनुः २अर्द्धसीरिशब्दार्थे च उदा० तत्रैव ।

**अर्द्धिन्** त्रि० अर्द्धं ग्रहीतृत्वेनास्त्यस्य इनि । अर्द्धग्रहणार्हे "सर्वेषामर्द्धिनोमुख्यास्तदर्द्धेनार्द्धिनोऽपरे। तृतीयिनस्तृतीयांशास्तुरीयांशास्तु पादिनः"। गोशतभागे स्मृतिः ।

**अर्द्धुक** त्रि० ऋध–बा०उकञ्। सम्पन्ने वृद्धिशीले "एकमतिरिक्तं जुहोति तस्मादेकः प्रजास्वर्द्धुकः" शत० ब्रा० ।

**अर्द्धेन्दु** पु० अर्द्धमिन्दोः एकदे०त० । १चन्द्रतुल्यांशे "जटाजूटसमायुक्तामर्द्धेन्दुकृतशेखराम्" दुर्गाध्यानम्। तदाकारत्वात् २नखक्षते ३तर्जन्यङ्गुष्ठविस्तारकृपे गलहस्तमुद्राभेदे ४अर्द्धचन्द्राकारे वाणे च ।

**अर्द्धोक्त** न०अर्द्धमुक्तम् वच–भावे क्त । अर्द्धकथने । "रामभद्रेत्यर्द्धोक्ते महाराज"! इति वीरचरिते कञ्चुकिवाक्यम्।

**अर्द्धोदक** न अर्द्धदेहव्यापकमुदकम् शाक०त० । देहार्द्धव्यापके उदके । "अर्द्धोदके तु जाह्नव्यां म्रियतेऽनशनेन यः । स याति न पुनर्जन्म ब्रह्मसायुज्यमेति च" अग्निपु० । "अर्द्धोदकं चरणान्नाभिपर्य्यमुदकम्" प्रा०त०रघुनन्दनः ।

**अर्द्धोदय** पु० अर्द्धस्य सम्बद्धस्य पुण्यस्य उदयो यत्र । तिथिनक्षत्रादियोगविशेषे "माघेमासि अामावस्या यदि अर्कयुता भवेत् । नक्षत्रे श्रवणे देवि ! व्यतीपातो भवेद्यदा । अर्द्धोदयः स विज्ञेयः सूर्य्यपर्वशतैःसमः । दिवैव योगः शस्तोऽयं न च रात्रौ कदाचन । अर्द्धोदये तु सम्प्राप्ते सर्वं गङ्गासमं जलम् । शुद्धात्मानो द्विजाः सर्वे भवेयुर्ब्रह्मसम्मिताः । यत् किञ्चित् क्रियते दानम् तद्दानं मेरुसन्निभमिति" निर्णया० । "अमार्कपातश्रवणैर्युता चेत् पौषमाघयोः । अर्द्धोदयः स विज्ञेयः कोटिसूर्य्यग्रहैः समः" स्क०पु० । "अर्द्धोदये च पुष्यार्के हस्तार्के रोहिणीबुधे" वृहन्नारदीयम् ।

**अर्द्धोदयासन** न० अर्द्धस्य देहस्य उदयेन ऊर्द्ध्वक्षेपेणासनम् "अर्द्धोदयासनं नाथ ! सर्व्वाङ्गं खे नियोजयेत् । केवलं हस्तयुगलं भुव्यवष्टभ्य तिष्ठति" रुद्रया० उक्ते आसनभेदे ।

**अर्द्धेन्दुमौलि** पु० अर्द्धेन्दुर्मौलावस्य। चन्द्रशेखरे शिवे ।

**अर्द्धोरुक** न० ०अर्द्धमूरोः अर्द्धोरु तत्र कायते काय-ड । १जर्व्वोरधरपर्य्यन्ताङ्गाच्छादने वस्त्रे, उत्तमस्त्रीणामर्द्धोरुपर्य्यन्ते चोलकाकारे २परिधेयवस्त्रे च ।

**अर्द्ध्य** त्रि० अर्द्धस्येदम् तत्र भवो वा वा यत् १अर्द्धसम्बन्धिनि २अर्द्धभवे च। ऋध-णिच्–यत् ।प्रवर्द्धनार्हे "विदुषा चिदर्द्ध्यः स्तोमः । ऋ०१,१५६,१, "अर्द्ध्यं वर्द्धनार्हम्, भा० "शविष्ठं वाजं विदुषा चिदर्द्ध्यम्" ऋ०५,४४,१० ।

**अर्पण** न० ऋ–णिच्–पुक् ल्युट् । १निक्षेपे,२ स्वत्वत्यागानुकूलव्यापारे ३निवेशने च । "पादार्पणानुग्रहपूतपृष्ठम्" "सेयं स्वदेहार्पणनिष्क्रयेण" "सुखार्पणेषु प्रकृतिप्रगल्भाः" इति च रघुः "ब्रह्मार्पणं ब्रह्महविर्ब्रह्माऽग्नौ ब्रह्मणा हुतम्" "तत् कुरुष्व मदर्पणमिति" च गीता करणे ल्युट् । ४मन्त्रादौ ५जुहूप्रभृतौ स्त्री । संप्रदाने ल्युटि । ६देवादिषु । अधिकरणे ल्युट् । त्यागाधिकरणे ७वह्न्यादौ । कर्म्मणि ल्युटि । ८हविरादौ त्याज्यद्रव्ये

**अर्पित** त्रि० ऋ–णिच्-पुक् च क्त । १दत्ते २निक्षिप्ते ३निवेशिते "तदनुज्वलनं मदर्पितम्" कुमा० ।"मय्यर्पितमनोवृत्तिः" गीता अनर्पितचरीं चिरात् करुणयावततीर्णः कलाविति" हरिभ० "हरिचक्रेण तेनास्य कण्ठे निष्कमिवार्पितम्" इति कुमा० ।

**अर्पिस** पु० ऋ–णिच् पुक् च इसन् । १हृदये, अग्रमांसे च ।

**अर्प्य** त्र० ऋ–णिच्-पुक यत् ।१निवेशनीये २देवे ३त्याज्ये च।

**अर्ब(र्व)** हिंसने भ्वादि०पर०सक० सेट् । अर्ब(र्व)ति आर्बी(र्वी)त् आन(र्ब)र्ब ।

**अर्बु(र्वु)द** न० अर्ब (र्व) विच् तस्मै उदेति उद्+इण्–ड । (आव् इति) ख्याते १मांसपिण्डाकारे रोगभेदे, स च सुश्रुतोक्तवर्त्माश्रयेषु एकविंशतिरोगेषु मध्ये रोगभेदः "पृथग्दोषा समस्ताश्च यदा वर्त्म व्यपाश्रयाः। सिरा व्याप्यावतिष्ठन्ते वर्त्मस्वधिकमूर्च्छिताः । विवर्द्ध्य मांसं रक्तञ्च तदा वर्त्मव्यापाश्रयान् । विकारान् जनयन्त्याशु नामतस्तान् निबोधत" इत्युपक्रम्य उत्सङ्गिनीप्रभृतीन् एकविंशति भेदान् उक्त्वा तेषां प्रत्येकलक्षणान्युक्तानि तत्र "वर्त्मान्तरस्थं विषमं ग्रन्थिभूतमवेदनम् । विज्ञेयमर्बुदं पुंसां सरक्तमवलम्बितम्" इत्यर्बुदलक्षणोक्तम् अर्बुदञ्च नानाविधं मांसार्बुदशोणितार्बुदादिभेदात् । "कृष्णस्फोटीसरक्तैश्च पिड़काभिश्च पीड़ितम् । यस्य वस्तिरुजश्चोग्रा ज्ञेयं तच्छोणितार्बुदम् । मांसदोषेण जानीयादर्बुदं मांससम्भवम्" एवं मेदोऽर्बुदादयोऽपि तत्रोक्ता रोगभेदा ज्ञेयाः । २दशकोटिसंख्यायां ३तत्संख्यातेषु च एकादिकोटिसंख्या दशगुणोत्तरा उक्ता अर्बुदमब्जं खर्वनिखर्वमहापद्मशङ्कवस्तस्मात्" लीला० "इमा मेऽग्न ! इष्टका धेनवःसन्त्वेका च दश च दश च शतं